**March – 2008** Reg. No. : ...................................... **G-3005**

Name : ......................................

Part-II

## SANSKRIT

Maximum : 80 Scores

Time : 2 ½ Hours

Cool-off time : 15 Minutes

***General Instructions to candidates :***

- There is a 'cool-off time' of 15 minutes in addition to the writing time of 2 ½ hrs.
- You are not allowed to write your answers nor to discuss anything with others during the 'cool-off time'.
- Use the 'cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.

**നിർദ്ദേശങ്ങൾ :**

- നിർദ്ദിഷ്ട സമയത്തിന് പുറമെ 15 മിനിറ്റ് 'കൂൾ ഓഫ് ടൈം' ഉണ്ടായിരിക്കും. ഈ സമയത്ത് ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതാനോ, മറ്റുള്ളവരുമായി ആശയ വിനിമയം നടത്താനോ പാടില്ല.
- ഉത്തരങ്ങൾ എഴുതുന്നതിന് മുമ്പ് ചോദ്യങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിക്കണം.
- എല്ലാ ചോദ്യങ്ങൾക്കും ഉത്തരം എഴുതണം.
- ഒരു ചോദ്യനമ്പർ ഉത്തരമെഴുതാൻ തെരഞ്ഞെടുത്തു കഴിഞ്ഞാൽ ഉപചോദ്യങ്ങളും അതേ ചോദ്യനമ്പരിൽ നിന്ന് തന്നെ തെരഞ്ഞെടുക്കേണ്ടതാണ്.

[**निर्देशा:** – 1. सर्वे प्रश्ना: समाधेया: ।
2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरत ।]

1. अध: प्रदत्तं श्लोकं सम्यक् पठत । निर्देशानुसारम् उत्तरत । **Scores 5**

लब्ध्वा निधानं न तथा दरिद्रो
गतिं समासाद्य तथा न पङ्गु: ।
तथा च नान्धो दृशमाप्य हृष्ये –
यथाऽऽप्तपुत्रस्स जहर्ष नन्द: ।।

(क) श्लोकेऽस्मिन् अधोरेखाङ्कितं पदं विश्लेषयत ।
यथा – वनं + अपि = वनमपि ।

(ख) श्लोकेऽस्मिन् क्त्वान्तपदं किम् ?

(आप्य, लब्ध्वा, समासाद्य)

(ग) निधिं इत्यर्थे प्रयुक्तं पदं किम् ?

(घ) श्लोकस्याशयं स्ववाक्यै: लिखत ।

2. "इह खेलति पूतनेति कृत्या" । इति केन उक्तम् ? **Score 1**

(नन्दगोपेन, कृष्णेन, वसुदेवेन)

3. हतभुजबलवीर्य: पार्थिवानां समक्षं स्ववचनकृतदोषो बध्यतामेष शीघ्रम् – सुयोधनकृतं वासुदेवबन्धनोद्यमं सूचनानुसारं विवृणुत । **Scores 8**

सूचना: – वासुदेवस्य प्रवेश: --------- पाण्डवेभ्य: राज्यार्धं दातुमर्हसि – तृणमपि न दास्येइति प्रतिवचनं --------- दुर्योधन: कृष्णं अधिक्षिपति --------- वासुदेवं बद्धुं स्वभ्रातृन् निर्दिशति --------- स: स्वयमेव बद्धुं प्रयतते --------- वासुदेव: विश्वरूपमवलम्ब्य तिष्ठति ।

4. निम्नलिखितं श्लोकं पठित्वा सूचनानुसारं आस्वादनटीकां रचयत । **Scores 4**

अथवा किमिवास्यते त्वयास्मिन्
निजमुत्सृज्य पदं पुरोपकण्ठे ।
सविधे न वसन्ति बुद्धिमन्त:
फणिनो वायुसरखस्य भूपतेश्च ।।

(सूचना: – औचित्यं, सन्दर्भसूचनं, श्लोकस्याशय:)

**5-9** कोष्ठात् समुचितमुत्तरं निर्धार्य लिखत । **Scores 5**

5. बालजीवितविलोपविश्रुता – का ?

(देवकी, यशोदा, पूतना)

6. हततनया इव भवेयु: – के ?

(पाण्डवा:, क्षत्रिया:, कौरवा:)

7. वने पितृव्य: मुनिशापमाप्तवान् – क:

(पाण्डु:, भीष्म:, धृतराष्ट्र:)

8. हतोऽयं मृत्युना स्वयम् – मृत्युना को हत: ?

(कंस:, चाणूर:, राहु:)

9. श्रीकृष्णविलासकाव्यस्य कर्ता क: ?

(नारायणभट्टतिरि:, भास:, सुकुमारकवि:)

10. अध: प्रदत्तं श्लोकांशं सम्यक् पठत । अत्र अधो रेखाङ्कितस्य पादस्य समानाशयरूपं वाक्यं प्रदत्तेभ्य: चित्वा लिखत । **Scores 2**

<u>ननूपभोगाय सुतायमास्ते</u>
गोवर्धनो नाम महीधरस्ते ।।

(क) हे सुत, तव भोग्याय अयं अस्ति ।
(ख) हे सुत, तव उपभोगाय अयं ध्रुवं वर्तते ।
(ग) हे सुत, तव भोगाय अयं आस्ते ।

11. केरलसंस्थानोत्पत्ते: संवत्सरमेकं निरन्तरं प्रवृत्तां सुवर्णजूबिल्याघोषपरम्परामधिकृत्य विदेशस्थं सुहृदं लेखमेकं लिखत । **Scores 6**

12. अध: प्रदत्तमाशयं सम्यक् पठत । तदाशयप्रतिपादकं श्लोकं प्रदत्ताभ्यां चित्वा लिखत । **Scores 2**

यज्ञेषु निवारितेषु विष्णौ अन्तं गते सति अखिलेष्वपि देवेषु क्षीणबलेषु सत्सु इन्द्रपुरी अस्माकं करे भविष्यति ।

- मखाश्च तत्प्रीतिकरा निवार्या
  निवारणीया श्रुतिरग्रिमाऽपि ।
  तृणीकृताशेषजनप्रभावा:
  संस्तौति या तन्महिमानमेव ।।
- गते विरामं गरुडध्वजेऽस्मि –
  न्मधेषु सर्वत्र निवारितेषु ।
  सुरेषु सर्वेष्वपि दुर्बलेषु
  हस्ते भविष्यत्यमरावती न: ।।

13. अध: प्रदत्तेषु चतुर्णां लघुटिप्पणी: लिखत । **Scores 8**

(1) स्थापना । (2) आत्मगतम् । (3) कञ्चुकी ।
(4) विष्कम्भ: । (5) नान्दी । (6) भरतवाक्यम् ।

14. अधोलिखितं गद्यमात्रं सम्यक् पठत । तदाशयं प्रादेशिक भाषया आङ्गलभाषया वा अनुवदत । **Scores 5**

भारतस्य उत्तरस्यां दिशि हिमालय: नाम महीधर: अस्ति । दैर्घ्येण वैशाल्येन च हिमालय: सर्वानपि पर्वतान् अतिशेते । न केवलं भारतखण्डे, किन्तु समग्रेऽपि भूमण्डले एतादृशोऽन्य: पर्वत: नास्ति । अतोऽयं 'नगाधिराज:' इति व्यपदिश्यते ।।

15. अधोलिखितेषु श्लोकेषु युष्माकम् इष्टतम: श्लोक: क: इति सयुक्तिकं प्रतिपादयत । **Scores 4**

- मुग्धभावमधुरेण रञ्जयन्
  शैशवेन हृदयं व्रजौकसाम् ।
  गोकुले स विजहार केशव:
  क्षीरवारिनिधिमप्यचिन्तयन् ।।
- सावतीर्य नभसो निशाचरी
  गूढमेव निषसाद कुत्रचित् ।
  सा च सुप्त इव लक्षिते सुते
  स्वापमाण सरसीरुहेक्षणा ।।
- नन्द: प्रमृज्य नयने मुहुरश्रुपूर्णे
  पुत्रं कृतान्तमुखनिर्गलितं निदध्यौ ।
  दध्यौ च तस्य नितरामभिवृद्धिकाम:
  तत्त्वं परं सहृदयेन समाहितेन ।।

16. इदानीं तव पुत्राः आगमिष्यन्ति ।
अस्मिन् वाक्ये अव्ययपदं किम् ? **Score 1**

17. कर्तव्यो भ्रातृषु स्नेहो विस्मर्तव्या गुणेतराः सम्बन्धो बन्धुभिः श्रेयान् – दूतवाक्यान्तर्गतं वासुदेव-दुर्योधनयोः उक्ति-प्रत्युक्तिं विशदयत । **Scores 8**

**सूचना:** – वासुदेवस्य कौरवसभाप्रवेशः, दुर्योधनस्य कुशलान्वेषणं, वासुदेवस्य प्रत्युक्तिः, वासुदेवः दुर्योधनं संक्षोभयति ।

18. अधोलिखितानि वाक्यानि संस्कृतभाषया अनुवदत । **Scores 3**

(क) നീ എന്തു ചെയ്യും ?

(ख) ദുര്യോധനനായിരുന്നു കൗരവരിൽ പ്രമുഖൻ.

(ग) വിദ്യയില്ലാത്തവൻ മൃഗതുല്യനാകുന്നു.

19. अधोलिखितं श्लोकं सम्यक् पठित्वा प्रदत्तानाम् प्रश्नानाम् उत्तराणि लिखत । **Scores 4**

न सा सभा यत्र न सन्ति वृद्धाः
वृद्धाः न ते ये न वदन्ति धर्मम् ।
धर्मः स नो यत्र न चास्ति सत्यं
सत्यं न तद्यत् छलमभ्युपैति ॥

(क) सा न सभा । का ?

(ख) ये न वृद्धाः । के ?

(ग) कुत्र धर्मः नास्ति ?

(घ) तत् न सत्यम् । किम् ?

20. अधः प्रदत्तं श्लोकं पठित्वा सूचनानुसारं गद्यक्रमं लिखत । **Scores 2**

शकटं मधुसूदनस्य दृष्ट्वा
चरणोद्ञ्चनविभ्रमेण भग्नम् ।
अथ कारिनिर्देविवेश गर्भं
स्वरथस्यापि विशंक्य भङ्गमर्कः ॥

**सूचना:** – अथ मधुसूदनस्य ----------- भग्नं ----------- अर्कः स्वरथस्य ----------- विशङ्क्य ----------- विवेश ।

21. पूतनामोक्षमधिकृत्य श्रीकृष्णविलासकाव्योक्तरीत्या स्ववाक्यैः प्रतिपादयत । **Scores 8**

**सूचना:** – अन्धकारः सर्वत्र व्याप्तः ----------- गोकुलवासिनः निद्रां प्राप्ताः । ----------- यशोदायाः प्रस्वापगानं ----------- पूतनायाः आगमनं ----------- कृष्णलालनं ----------- स्तन्यदानं ----------- पूतनामरणञ्च ।

22. राहुवक्त्रान्तरगता चन्द्रलेखेव शोभते । अनेन सूचिता कथा संगृह्य लिखत । **Scores 4**

**सूचना:** – अमृतमथनेन लब्धममृतम् ---------- सिंहिकेयस्य अमृतपानं ---------- सुदर्शनचक्रेण कपटब्राह्मणस्य कण्ठछेदनं, राहोः सूर्यचन्द्राभ्यां सह प्रवृद्धवैरम् ।